एकादशः पाठः

# ग्राम्यजीवनम्

[अयं पाठः आधुनिकजीवनस्य वैषम्यं विडम्बनां च दर्शयति। पुरा सर्वत्र ग्राम्यजीवनस्य प्रशंसायां विपुलं साहित्यं रचितम्। किन्तु भौतिकजीवनस्य विकासेन सह ग्राम्यजीवनस्य समस्यावृद्धिर्जाता इति नोपेक्षणीयम्। नगरजीवनमिव ग्राम्यजीवनं न रोचते तद्वासिभ्योऽपि सम्प्रति। अतोऽद्यतनं जीवनं वैषम्यमयमिति दर्शितं लेखकेन। अस्माभिश्च किं करणीयमिति प्रतिपादितम्।]

अस्माकं देशे जनाः ग्रामे नगरे च वसन्ति। ग्रामाणां संख्या नगरापेक्षया नूनमधिका वर्तते। नगराणां संख्या तु क्रमशः वर्धते किन्तु ग्रामसंख्या न तथा वृद्धिं लभते। अधुना ये नगरवासिनः, प्राचीनकाले ते ग्रामवासिनः एव। केचित् स्वग्रामेण संबन्धमद्यापि निर्वहन्ति।

एका प्राचीनोक्तिर्वर्तते–प्रकृतिर्ग्राममसृजत्, नगरं तु मानवस्य रचनेति। अस्यार्थस्तु– ग्रामस्य विकासः प्राकृतिकः, नगराणि तु कृत्रिमाणि सन्ति। मानवः स्वस्य भौतिकीं सुखसमृद्धिं कल्पयित्वा महता प्रयासेन नगराणि निर्ममे। भोजनं वसनम् आवासश्चेति तिस्रः आवश्यकताः मानवस्य वर्तन्ते। ग्रामे एताः न्यूनतमाः प्राप्यन्ते इति तत्रत्याः जनाः सन्तोषप्रधानाः। किन्तु एतल्लाभार्थं धनमावश्यकम्। कृषिप्रधाना धनव्यवस्था ग्रामेऽद्यापि वर्तते। क्वचिदेव व्यापारः उद्योगो वा विद्यते। अतएव ग्राम्यजनाः धनार्जनाय नगरं प्रति पलायमाना दृश्यन्ते।

प्राचीनकाले ग्राम्यजीवनं बहुसुखमयं बभूव। सन्तुष्टाः ग्रामवासिनः यदा कदैव नगरं गच्छन्ति स्म। सुखस्य साधनानि तदानीमुपलब्धानि ग्रामीणेभ्यो रोचन्ते। शुद्धं जलं निर्मलो वायुः, स्वपरिश्रमार्जितमन्नं, समाजे सामञ्जस्यं, जनानां परिमिता च संख्या–एतत्सर्वं ग्राम्यजीवनस्य लक्षणं बभूव। कृत्रिमा भौतिकी संस्कृतिः भारतस्य ग्रामान् बहुकालं यावत् नास्पृशत्। विदेशेषु तु ग्रामेऽपि वैज्ञानिकी समृद्धिरागता यथा–विद्युत्प्रवाहः, आधुनिकसंचारव्यवस्था, यातायातसाधनानि, कृषिकर्मणे यन्त्रोपस्करादीनि च। नेदं भारतीयग्रामेषु दृश्यते प्रायेण। अतएवाद्य ग्राम्यजीवनं न वरदानरूपं मन्यते। सम्पन्नाः ग्रामीणा अपि

नगरं प्रति पलायनपरा:, तत्र का कथा विपन्नानां वृत्तिहीनानां ग्रामजनानाम्?इमे नगरेषु जीविकां लभन्ते, पूर्वे तु सुखसमृद्धिजातं भौतिकीं सुविधां चेति।

अपि च, ग्रामे नाद्य स्वर्गस्य कल्पना वर्तते। अत: नाद्यत्वे ग्राम्यजीवनं प्रशस्तमिति साहित्येषु गीयते। अद्य क्वचिद् ग्रामेषु अनावृष्टिकारणात्, क्वचिच्चातिवृष्टिनिमित्तात्, कदाचिन्नदीषु जलपूरेण तटबन्धभङ्गात् महदेव ग्रामजनसंकटम् आपद्यते। विहारप्रदेशे तु सर्वमिदं युगपद् दृश्यते इत्यभिशापमेव मन्यन्ते ग्राम्यजीवनम्। समाजे च राजनीतिप्रसारेण दलप्रतिबद्धता, जातिवाद: भूमिविवाद: इत्याद्यपि संकटकारणं विशेषेण ग्रामेषु दृश्यते।

तदर्थं मानवतावादस्य विकास: आवश्यक:। युवका जने जने समताभावं दर्शयन्तु। प्रकृति: सर्वान् मानवान् समानशरीरावयवै: रचयति। कुतस्तत्र कृत्रिमो मानवकृतो वैरभाव:?ग्रामे कामं न भवतु भौतिकी समृद्धि:, किन्तु पर्यावरणस्य निर्मलता तत्रैव बाहुल्येन वर्तते इति न सन्देह:। नगरजीवनस्य समृद्धि:ग्रामेऽपि समानेया प्रशासनेन। तदैव ग्राम्यजीवनं सुखदं काम्यं च भविष्यति। नगरं प्रति पलायनं चावरुद्धं स्यात्।

## शब्दार्था:

| | | |
|---|---|---|
| **निर्वहन्ति** | यथा कथमपि धारयन्ति | निबाह रहे हैं |
| **असृजत्** | अरचयत् | सृष्टि की |
| **भौतिकीम्** | बाह्याम् | ऊपरी |
| **कल्पयित्वा** | विचार्य | विचार करके |
| **तत्रत्या: ( तत्र+त्यप् )** | तत्र स्थिता: | वहाँ के |
| **वसनम्** | वस्त्रम् | कपड़े, परिधान |
| **पलायमाना:** | धावन्त: | भागते हुए |
| **सामञ्जस्यम्** | समरसता, सहभाव: | एक साथ रहना |
| **का कथा?** | किं वक्तव्यम्? | क्या कहना? |
| **वृत्तिहीना:** | जीविकारहिता: | जीविका के साधन से रहित |
| **जातम्** | समूह:, उपादानानि | समूह |

| | | |
|---|---|---|
| **अद्यत्वे** | आधुनिके समये | आज कल |
| **दलप्रतिबद्धता** | राजनीतिदलं प्रति बन्धनम् | दलों से बँध जाना |
| **प्रशस्तम्** | शोभनम् | अच्छा |
| **कामम् ( अव्यय )** | यद्यपि | भले ही |
| **अवरुद्धम्** | निवारितम् | रुका हुआ |

## व्याकरणम्

### 1. सन्धिविच्छेदः

**आवासश्चेति** = आवासः + च + इति

**समृद्धिरागता** = समृद्धिः + आगता

**नास्पृशत्** = न + अस्पृशत्

**कदाचिन्नगरेषु** = कदाचित् + नगरेषु

**इत्याद्यपि** = इति + आदि + अपि

**चावरुद्धम्** = च + अवरुद्धम्

**एतल्लाभार्थम्** = एतत् + लाभार्थम्

**नोपेक्षणीयम्** = न + उपेक्षणीयम्

**वासिभ्योऽपि** = वासिभ्यः + अपि

**नगरापेक्षया** = नगर + अपेक्षया

**नूनमधिका** = नूनम् + अधिका

**कदैव** = कदा + एव

### 2. प्रकृति-प्रत्ययविभागः

**प्राकृतिकः** = प्रकृति + ठक्

**भौतिकी** = भूत + ठक् + ङीप्

| | | |
|---|---|---|
| **पलायमाना** | = | परा + ☒> अय + शानच् |
| **संस्कृतिः** | = | सम् + ☒> कृ + क्तिन् |
| **वैज्ञानिकी** | = | विज्ञान + ठक् + ङीप् |
| **निर्मलता** | = | निर्मल + तल् + टाप् |
| **ग्राम्यः** | = | ग्राम + यत् |
| **काम्यम्** | = | Öकम् + णिच् + ण्यत् |
| **अवरुद्धम्** | = | अव + Öरुध् + क्त |
| **कदा** | = | किम् + दा |
| **यदा** | = | यत् + दा |

## 3. पद-परिचयः

| | | |
|---|---|---|
| वर्तते | – | वृत् धातु (आत्मनेदपद), लट् लकार, प्रथमपुरुष, एकवचन |
| असृजत् | – | सृज् धातु, लङ् लकार, प्रथमपुरुष, एकवचन |
| प्राप्यन्ते | – | प्र उपसर्ग, आप् धातु कर्मवाच्य, लट् लकार, प्रथमपुरुष, बहुवचन |
| बभूव | – | भू धातु, लिट् लकार, प्रथमपुरुष, एकवचन |
| अस्पृश्यत् | – | स्पृश् धातु, लङ लकार, प्रथमपुरुष, एकवचन |
| स्यात् | – | अस् धातु, विधिलिङ्, प्रथमपुरुष, एकवचन |

## 4. समास-विग्रहः

| | | |
|---|---|---|
| **नगरापेक्षया** | – | नगरस्य अपेक्षया (षष्ठी तत्पुरुष) |
| **सुखसमृद्धिः** | – | सुखसहिता समृद्धिः (मध्यमपदलोपी) |
| **धनार्जनाय** | – | धनस्य अर्जनाय (षष्ठी तत्पुरुष) |
| **ग्राम्यजीवनम्** | – | ग्राम्यं जीवनम् (कर्मधारय) |
| **अनावृष्टिः** | – | न आवृष्टिः (नञ् समासः) |

## अभ्यासः ( मौखिकः )

**1. निम्नलिखितानां प्रश्नानामुत्तरं दत्त**

(क) अस्माकं देशे जना:कुत्र वसन्ति?

(ख) भारते केषां संख्या अधिका अस्ति?

(ग) प्राचीनकाले ग्राम्यजीवनं कीदृशम् आसीत्?

(घ) विदेशेषु ग्रामेऽपि कीदृशी समृद्धिः आगता?

(ङ) अद्य ग्रामे कस्य कल्पना नास्ति?

## अभ्यासः ( लिखितः )

**1. अधोलिखितप्रश्नानाम् उत्तराणि संस्कृतभाषया दत्त**

(क) भारतं केषाम् देश: अस्ति?

(ख) देशे ग्रामापेक्षया केषां संख्या क्रमश: वर्धते?

(ग) मानव: कां कल्पयित्वा नगराणि निर्ममे?

(घ) मानवेभ्य: केषां वस्तूनाम् आवश्यकता वर्तते?

(ङ) अद्यत्वे ग्रामेषु कीदृशं संकटकारणं दृश्यते?

**2. अधोलिखितानां पदानां प्रकृति-प्रत्ययविभागं लिखत–**

संस्कृति:, ग्राम्यम्, अवरुद्धम्, वैज्ञानिक:, कदा।

**3. सन्धिविच्छेदं कुरुत–**

(क) ग्रामेऽद्यपि – ......... + ......... + ......... ।

(ख) एतल्लाभ: – ......... + ......... ।

(ग) धनार्जनम् – ......... + ......... ।

(घ) चेति – ......... + ......... ।

(ङ) प्राचीनोक्ति: – ......... + ......... ।

## 4. अधोलिखितानां वाक्यानां संस्कृतभाषायामनुवादं कुरुत–

(क) हमारे देश में अधिक लोग गाँव में रहते हैं।

(ख) प्राचीन काल में गाँव का जीवन सुखमय था।

(ग) गाँव में न्यूनतम सुविधाएँ हैं।

(घ) गाँव के लोग नगरों में जीविका पाते हैं।

(ङ) गाँव में आज स्वर्ग की कल्पना नहीं है।

## 5. अधोलिखितानां पदानां स्ववाक्येषु प्रयोगं कुरुत–

निर्वहन्ति, अधुना, पुरा, कदा, पलायते।